नानानं वा उ नो धियो वि व्रतानि जनानाम् ।
तक्षा रिष्टं रुतम् भिषग् ब्रह्मा सुन्वन्तम् इच्छतीन्द्रायेन्दो परि स्त्रव ॥ ०१

जरतीभिर् ओषधीभिः पर्णेभिः शकुनानाम् ।
कार्मारो अश्मभिर् द्युभिर् हिरण्यवन्तम् इच्छतीन्द्रायेन्दो परि स्त्रव ॥ ०२

कारुर् अहं ततो भिषग् उपलप्रक्षिणी नना ।
नानाधियो वसूयवो ऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्त्रव ॥ ०३

अश्वो वोळ्हा सुखं रँ हसनाम् उपमन्त्रिणः ।
शेपो रोमण्वन्तौ भेदौ वार् इन् मण्डूक इच्छतीन्द्रायेन्दो परि स्त्रव ॥ ०४